श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

## पञ्चषष्टितमः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः
श्रीसीतारामाभ्यां नमः
श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## पञ्चषष्टितमः सर्गः

*हनुमता श्रीरामं प्रति सीतावृत्तान्तस्य निवेदनम्*

ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननम्।
प्रणम्य शिरसा रामं लक्ष्मणं च महाबलम्॥ ५.६५.१ ॥

युवराजं पुरस्कृत्य सुग्रीवमभिवाद्य च।
प्रवृत्तिमथ सीतायाः प्रवक्तुमुपचक्रमुः॥ ५.६५.२ ॥

रावणान्तःपुरे रोधं राक्षसीभिश्च तर्जनम्।
रामे समनुरागं च यथा च नियमः कृतः॥ ५.६५.३ ॥

एतदाख्याय ते सर्वं हरयो रामसन्निधौ।
वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत्॥ ५.६५.४ ॥

क्व सीता वर्तते देवी कथं च मयि वर्तते।
एतन्मे सर्वमाख्यात वैदेहीं प्रति वानराः॥ ५.६५.५ ॥

रामस्य गदितं श्रुत्वा हरयो रामसन्निधौ।
चोदयन्ति हनूमन्तं सीतावृत्तान्तकोविदम्॥ ५.६५.६ ॥

श्रुत्वा तु वचनं तेषां हनूमान् मारुतात्मजः।
प्रणम्य शिरसा देव्यै सीतायै तां दिशं प्रति॥ ५.६५.७ ॥

उवाच वाक्यं वाक्यज्ञः सीताया दर्शनं यथा।
तं मणिं काञ्चनं दिव्यं दीप्यमानं स्वतेजसा॥ ५.६५.८ ॥

दत्त्वा रामाय हनुमांस्ततः प्राञ्जलिरब्रवीत्।
समुद्रं लङ्घयित्वाहं शतयोजनमायतम्॥ ५.६५.९ ॥

www.prapatti.com

अगच्छं जानकीं सीतां मार्गमाणो दिदृक्षया।
तत्र लङ्केति नगरी रावणस्य दुरात्मनः॥ ५.६५.१० ॥

दक्षिणस्य समुद्रस्य तीरे वसति दक्षिणे।
तत्र सीता मया दृष्टा रावणान्तःपुरे सती॥ ५.६५.११ ॥

त्वयि संन्यस्य जीवन्ती रामा राम मनोरथम्।
दृष्टा मे राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः॥ ५.६५.१२ ॥

राक्षसीभिर्विरूपाभी रक्षिता प्रमदावने।
दुःखमापद्यते देवी त्वया वीर सुखोचिता॥ ५.६५.१३ ॥

रावणान्तःपुरे रुद्धा राक्षसीभिः सुरक्षिता।
एकवेणीधरा दीना त्वयि चिन्तापरायणा॥ ५.६५.१४ ॥

अधःशय्या विवर्णाङ्गी पद्मिनीव हिमागमे।
रावणाद् विनिवृत्तार्था मर्तव्यकृतनिश्चया॥ ५.६५.१५ ॥

देवी कथञ्चित् काकुत्स्थ त्वन्मना मार्गिता मया।
इक्ष्वकुवंशविख्यातिं शनैः कीर्तयतानघ॥ ५.६५.१६ ॥

सा मया नरशार्दूल शनैर्विश्वासिता तदा।
ततः सम्भाषिता देवी सर्वमर्थं च दर्शिता॥ ५.६५.१७ ॥

रामसुग्रीवसख्यं च श्रुत्वा हर्षमुपागता।
नियतः समुदाचारो भक्तिश्चास्याः सदा त्वयि॥ ५.६५.१८ ॥

एवं मया महाभागा दृष्टा जनकनन्दिनी।
उग्रेण तपसा युक्ता त्वद्भक्त्या पुरुषर्षभ॥ ५.६५.१९ ॥

अभिज्ञानं च मे दत्तं यथावृत्तं तवान्तिके।
चित्रकूटे महाप्राज्ञ वायसं प्रति राघव॥ ५.६५.२० ॥

विज्ञाप्यः पुनरप्येष रामो वायुसुत त्वया।
अखिलेन यथा दृष्टमिति मामाह जानकी॥ ५.६५.२१ ॥

अयं चास्मै प्रदातव्यो यत्नात् सुपरिरक्षितः।
ब्रुवता वचनान्येवं सुग्रीवस्योपशृण्वतः॥ ५.६५.२२ ॥

एष चूडामणिः श्रीमान् मया ते यत्नरक्षितः।
मनःशिलायास्तिलकं तत् स्मरस्वेति चाब्रवीत्॥ ५.६५.२३ ॥

एष निर्यातितः श्रीमान् मया ते वारिसम्भवः।
एनं दृष्ट्वा प्रमोदिष्ये व्यसने त्वामिवानघ॥ ५.६५.२४ ॥

जीवितं धारयिष्यामि मासं दशरथात्मज।
ऊर्ध्वं मासान्न जीवेयं रक्षसां वशमागता॥ ५.६५.२५ ॥

इति मामब्रवीत्सीता कृशाङ्गी धर्मचारिणी।
रावणान्तःपुरे रुद्धा मृगीवोत्फुल्ललोचना॥ ५.६५.२६ ॥

एतदेव मयाऽऽख्यातं सर्वं राघव यद्यथा।
सर्वथा सागरजले सन्तारः प्रविधीयताम्॥ ५.६५.२७ ॥

तौ जाताश्वासौ राजपुत्रौ विदित्वा
　　तच्चाभिज्ञानं राघवाय प्रदाय।
देव्या चाख्यातं सर्वमेवानुपूर्व्याद्
　　वाचा सम्पूर्णं वायुपुत्रः शशंस॥ ५.६५.२८ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चषष्टितमः सर्गः॥



www.prapatti.com